# आदर्श प्रश्नपत्रम्

# विषय : संस्कृतम्

**कक्षा - दशमी** रोल नं० | | | | | | | | | | |

समयः - होरात्रयम् ] [ पूर्णाङ्काः – 80

---

- **सामान्यनिर्देशाः :–**

I. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
II. प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
III. श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टः लेखः लेखनीयः।

- **अस्मिन् प्रश्नपत्रे पञ्च खण्डाः सन्ति :–**

| | | |
|---|---|---|
| खण्डः 'क' | अपठित-अवबोधनम् | - 5 अङ्काः |
| खण्डः 'ख' | रचनात्मक-कार्यम् | - 10 अङ्काः |
| खण्डः 'ग' | पठित-अवबोधनम् | - 22 अङ्काः |
| खण्डः 'घ' | अनुप्रयुक्त-व्याकरणम् | - 19 अङ्काः |
| खण्डः 'ङ' | पाठाधारिताः बहुविकल्पीयाः प्रश्नाः | - 24 अङ्काः |

### खण्डः 'क'

## अपठित-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि पूर्णवाक्येन संस्कृतेन लिखत –

( केवलं पञ्चप्रश्नाः ) 5x1 = 5

अस्माकं देशे अनेकानि राज्यानि सन्ति। तेषु हरियाणाराज्यम् अतिलघुराज्यं वर्तते। अस्य उदयः 1966 तमे वर्षे नवम्बर मासस्य प्रथमे दिनाङ्के अभवत्। हरियाणाप्रदेशः वीराणां भूमिः कथ्यते। अस्य कुरुक्षेत्रे नगरे महाभारतस्य युद्धम् अभवत्। श्रीकृष्णः अर्जुनाय गीतायाः उपदेशम् अत्रैव अयच्छत्। इदं राज्यं कृषिप्रधानराज्यम् अस्ति। अस्य भूमिः अति उपजाऊः अस्ति। अस्य कृषकाः अतीव परिश्रमं कुर्वन्ति। जनाः साधारणं जीवनं व्यतीतं कुर्वन्ति।

**प्रश्नाः :-**

(क) हरियाणा राज्यस्य उदयः कदा भवति?

(ख) श्रीकृष्णः कस्मै गीतायाः उपदेशम् अयच्छत्?

(ग) अस्य कृषकाः किं कुर्वन्ति?

(घ) हरियाणाराज्यस्य भूमिः कीदृशी अस्ति?

(ङ) 'अतीव' पदस्य सन्धिविच्छेदं कुरुत।

(च) महाभारतस्य युद्धं कुत्र अभवत्?

(छ) जनाः कीदृशं जीवनं व्यतीतं कुर्वन्ति?

## खण्डः 'ख'

## रचनात्मक-कार्यम्

2. अवकाशार्थं मुख्याध्यापकं प्रति प्रार्थनापत्रं पठित्वा मञ्जूषाप्रदत्तशब्दैः रिक्तस्थानानि पूरयित्वा लिखत- 5×1=5

सेवायाम्,
मुख्याध्यापक महोदयः,
रा. व.मा. विद्यालयः,
भिवानी।

श्रीमन् !

सविनयं (1) ...................अस्ति यत् मम (2) ........... अद्य ज्वरपीड़िता जाता। मातुः (3) .............. गृहे मम आवश्यकता वर्तते। कृपया दिनद्वयस्य अवकाशं दत्त्वा माम् (4) .................... भवन्तः।

भवतां शिष्यः,

(5) .................।

कक्षा – दशमी
अनुक्रमांक – 5

**मञ्जूषा**

| |
|---|
| माता, सेवार्थं, निवेदनम् , अनुगृह्णन्तु , मोहनः |

3. निर्दिष्टचित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दैः उचितरिक्तस्थानानि पूरयित्वा लिखत -

( केवलं पञ्चप्रश्नाः ) 5×1=5



1. इदं चित्रम् एकस्य .................. अस्ति।
2. अस्मिन् चित्रे ................ वानराः सन्ति।
3. वानराः .......................... भवन्ति।
4. वानराः .............................. खादन्ति।
5. वृक्षे एकः ....................... अपि तिष्ठति।
6. मयूरः ................पक्षी अस्ति।

**मञ्जूषा**

| राष्ट्रियः, चपलाः, कदलीफलानि, वृक्षस्य, त्रयः, मयूरः |
|---|

## खण्डः 'ग'

# पठित-अवबोधनम्

4. निम्नलिखितं गद्यांशं पठित्वा हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 1×5=5

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श।

**अथवा**

विचित्रा दैवगतिः। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन् चौरः गृहाभ्यन्तरं प्रविष्टः। तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धः अतिथिः चौरशङ्कया तमन्वधावत् अगृह्णाच्च।

5. अधोलिखितश्लोकस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 1×5=5

गुणी गुणं वेत्ति न वेत्ति निर्गुणो,
बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः,
करी च सिंहस्य बलं न मूषकः॥

**अथवा**

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।

तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः।।

6. अधोलिखितासु सूक्तिषु कस्याश्चिद् एकस्याः सूक्तेः भावार्थं हिन्दीभाषया लिखत - 1×2=2

(क) निशान्धकारे प्रसृते विजनप्रदेशे पदयात्रा न शुभावहा।

(ख) आचारः प्रथमो धर्मः।

(ग) अहो हृदयग्राही स्पर्शः।

**अथवा**

अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः उचितपदं चित्वा पूरयत - 2×1=2

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।

नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।।

**अन्वयः :-**

मनुष्याणां शरीरस्थः महान् रिपुः (1) ............। उद्यमसमः (2) .............. न अस्ति यं कृत्वा न अवसीदति।।

**मञ्जूषा**

| |
|---|
| बन्धुः, आलस्यम् |

7. अधः प्रदत्तं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन पूर्णवाक्येन लिखत - 2×1=2

(केवलं प्रश्नद्वयम्)

एकः सिंहः सुखेन विश्राम्यते। तदैव एकः वानरः आगत्य तस्य पुच्छं धुनोति। क्रुद्धः सिंहः तं प्रहर्तुम् इच्छति परं वानरः तु कूर्दित्वा वृक्षमारुढः।

**प्रश्नाः :-**

(क) वानरः कुत्र आरुढः?

(ख) पुच्छं कः धुनोति?

(ग) 'कूर्दित्वा' पदे कः प्रत्ययः?

8. निम्नलिखितश्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन पूर्णवाक्येन लिखत - 2×1=2

(केवलं प्रश्नद्वयम्)

एक एव खगो मानी वने वसति चातकः।
पिपासितो वा म्रियते याचते वा पुरन्दरम्॥

**प्रश्नाः :-**

(क) चातकः कुत्र वसति?

(ख) चातकः कं याचते?

(ग) 'खगः' पदे का विभक्तिः?

9. रेखाङ्कितपदानि आधृत्य कोष्ठकात् शुद्धपदं चित्वा प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नत्रयम्) 3×1=3

(क) शकटीयानं कज्जलमलिनं धूमं मुञ्चति। (केषां/कीदृशम्)

(ख) तत्र राजसिंहः नाम राजपुत्रः वसति स्म। (कः/कम्)

(ग) धेनूनां माता सुरभिः आसीत्। (कया/कासां)

(घ) गजः वन्यपशून् तुदन्तं शुण्डेन पोथयित्वा मारयति। (कस्मिन्/केन)

10. प्रश्नपत्रे लिखितश्लोकान् विहाय **'शेमुषी भाग-2'** पुस्तकाद् एकं श्लोकं संस्कृतभाषया लिखत। 1×3=3

## खण्डः – 'घ'

## अनुप्रयुक्त-व्याकरणम्

11. स्वरसन्धेः अथवा दीर्घसन्धेः परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 1×2=2

12. द्विगुसमासस्य अथवा अव्ययीभावसमासस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 1×2=2

13. कर्ताकारकस्य अथवा करणकारकस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 1×2=2

14. निर्देशानुसारं शब्दरूपाणि लिखत - (केवलं प्रश्नत्रयम्) 3×1=3

(क)'राम' शब्दस्य तृतीया-बहुवचने।

(ख) 'लता' शब्दस्य सप्तमी-द्विवचने।

(ग) 'कवि' शब्दस्य चतुर्थी-एकवचने।

(घ) 'किम्' (स्त्री.) शब्दस्य षष्ठी-बहुवचने।

(ङ) 'साधु' शब्दस्य पञ्चमी-एकवचने।

15. निर्देशानुसारं धातुरूपाणि लिखत - (केवलं प्रश्नत्रयम्) 3×1=3

(क) 'गम्' (गच्छ्) धातोः लोट्लकारस्य, मध्यमपुरुष-बहुवचने।

(ख) 'पठ्' धातोः लृट्लकारस्य, प्रथमपुरुष-बहुवचने।

(ग) 'हस्' धातोः लङ्लकारस्य, उत्तमपुरुष-द्विवचने।

(घ) 'अस्' धातोः लट्लकारस्य, मध्यमपुरुष-बहुवचने।

(ङ) 'सेव्' धातोः लट्लकारस्य, उत्तमपुरुष-बहुवचने।

16. प्रदत्तोपपदविभक्तिवाक्येषु उचितविभक्तिं कोष्ठकात् चित्वा लिखत। (केवलं प्रश्नद्वयम्) 2×1=2

(क) .............. उपसृत्य प्रणम्य च। (रामम्/रामात्)

(ख) अलम् .................... । (अतिविस्ताराय/अतिविस्तरेण)

(ग) बुद्धिमती पितुः .................. प्रति गच्छति। (गृहे /गृहं )

17. अधोलिखितानाम् अव्ययपदानां सहायतया रिक्तस्थानानि पूरयत। (केवलं प्रश्नद्वयम्) 2×1=2

(क) ........... जीवनं दुर्वहम् अस्ति। (भृशम् / अत्र)

(ख) ............ समयस्य सदुपयोगः करणीयः। (श्वः / सदा)

(ग) यत्रास्ते सा धूर्ता ............ गम्यताम्। (तत्र/ एकदा)

18. निम्नक्रियापदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत। (केवलं प्रश्नत्रयम्) 3×1=3

(क) परिष्वज्य (ख) आक्षिपन्ती (ग) प्रत्यवोचत् (घ) अवसीदति
(ङ) विश्राम्यति

## खण्डः – 'ङ'

## पाठाधारिताः बहुविकल्पीयाः प्रश्नाः

19. अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत - 24×1=24

(क) 'ग्राम+अन्ते' इत्यत्र किं सन्धिपदम्?

(i) ग्रामन्ते (ii) ग्रामान्ते

(iii) ग्राम अन्ते (iv) ग्रामान्त

(ख) 'एकैक:' इत्यत्र कः सन्धिविच्छेदः?

(i) ए +कैक: (ii) एकै + क:

(iii) एक +एक: (iv) एक+ क:

(ग) 'समानाभिजनौ' अत्र क: सन्धि:?

(i) दीर्घसन्धि: (ii) गुणसन्धि:

(iii) यण् सन्धि: (iv) वृद्धि सन्धि:

(घ) 'निर्बल:' इत्यस्मिन् पदे कः समासः?

(i) द्विगुः (ii) अव्ययीभावः

(iii) कर्मधारयः (iv) द्वन्द्वः

(ङ) 'उद्यमसम:' इत्यस्य पदस्य विग्रहपदं किम्?

(i) उद्यमेन सम: (ii) उद्यमात् सम:

(iii) उद्यमाय सम: (iv) उद्यमस्य सम:

(च) 'पक्षिणां सम्राट्' इत्यस्य समस्तपदं लिखत|

(i) पक्षिसम्राट् (ii) पक्षेसम्राट्

(iii) पक्षिषुसम्राट् (iv) पक्षिनासम्राट्

(छ) 'दानवाय' इत्यस्य पदस्य विलोमपदं किम्?

(i) मानवाय (ii) राक्षसाय

(iii) निशाचराय (iv) रावणाय

(ज) 'बुद्धिहीना' इत्यस्य पदस्य विलोमपदम् किम्?

(i) मूर्ख: (ii) मूढ:

(iii) बुद्धिमती (iv)बुद्धिमानी

(झ) 'सम्पत्तौ' इत्यस्य पदस्य विलोमपदम् किम्?

(i) सम्पन्ने (ii) विपत्तौ

(iii) समये (iv) संकटे

(ञ) 'हिमकर:' इत्यस्य शब्दस्य पर्यायपदं किम्?

(i) दिनकर: (ii) दिवाकर:

(iii) सूर्य: (iv) निशाकर:

(ट) 'मुखम्' इत्यस्य पदस्य पर्यायपदं किम्?

(i) नेत्रम् (ii) श्रोत्रम्

(iii) वक्त्रम् (iv) ग्रीवा

(ठ) 'इन्द्र:' इत्यस्य पदस्य पर्यायपदं किम्?

(i) वृषभ: (ii) ऋषभ:

(iii) सुराधिप: (iv) सुत:

(ड) 'दृश्+ क्त्वा' इत्यस्य संयोगे किं रूपम्?

(i) दृष्ट्वा (ii) दर्शित्वा

(iii) दृशित्वा (iv) दुर्शित्वा

(ढ) 'परिश्रम्य' इत्यस्मिन् पदे कः प्रत्ययः?

(i) क्त्वा (ii) शतृ

(iii) ल्यप् (iv) तुमुन्

(ण) 'निर्णेतुम्' इत्यस्मिन् पदे कः प्रत्ययः?

(i) क्त्वा (ii) शतृ

(iii) ल्यप् (iv) तुमुन्

(त) 'एकोन पञ्चाशत्' इत्यस्मिन् पदे का संख्या?

(i) 95 (ii) 59

(iii) 49 (iv) 69

(थ) '18' अङ्कस्थाने किं संख्यावाचिपदम्?

(i) अष्टाविंशति: (ii)अष्टादश

(iii) अष्ट (iv) अष्टत्रिंशत्

(द) '90' अङ्कस्थाने किं संख्यावाचिपदम्?

(i) नवति: (ii)नवदश

(iii) अशीति: (iv) पञ्चाशीति:

(ध) 'ध्वस्तेषु भवनेषु' अत्र किं विशेष्यपदम्?

(i) भवनेषु (ii) ध्वस्तेषु

(iii) ध्वस्तभवनम् (iv) ध्वेषु

(न) निर्धन: जन:' अत्र किं विशेषणपदम्?

(i) जन:		(ii) निर्धन:

(iii) निर्धनजन:		(iv) जनानाम्

(प) 'तत्त्वार्थस्य' इत्यस्मिन् पदे का विभक्ति?

(i) षष्ठी		(ii) पञ्चमी

(iii) तृतीया		(iv) द्वितीया


(फ) 'पशुना' इत्यस्मिन् पदे का विभक्ति:?

(i) प्रथमा		(ii) सप्तमी

(iii) सम्बोधन		(iv) तृतीया

(ब) घटिकां दृष्ट्वा समयेन रिक्तस्थानं संस्कृतपदेन पूरयत -

बालकः प्रातः ............. वादने विद्यालयं गच्छति।





(i) द्वादश		(ii) त्रयः

(iii) सप्त		(iv) पञ्च

(भ) घटिकां दृष्ट्वा समयेन रिक्तस्थानं संस्कृतपदेन पूरयत -

अहं सायं ................ भ्रमणाय गच्छामि।




(i) चतुर्वादने		(ii) त्रयवादने

(iii) षड्वादने		(iv) दशवादने